| अध्याये | विषयः | पृष्ठे। |
|---|---|---|
| ५७ | कलशाधिवासः .. | १६१ |
| ५८ | देवस्नपनविधिः ... | १६४ |
| ५९ | देवाधिवासनविधिः ... | १६७ |
| ६० | वासुदेवप्रतिष्ठा ... | १७३ |
| ६१ | द्वारप्रतिष्ठाध्वजारोहणादिकथनं | १७७ |
| ६२ | लक्ष्मीप्रतिष्ठा .. | १८२ |
| ६३ | सुदर्शनचक्रादिप्रतिष्ठा | १८४ |
| ६४ | कूपादिप्रतिष्ठा .. | १८७ |
| ६५ | सभागृहस्थापनम् ... | १९१ |
| ६६ | साधारणप्रतिष्ठा ... | १९४ |
| ६७ | जीर्णमूर्त्युद्धारः .. | १९७ |
| ६८ | देवयात्रोत्सवः .. | १९८ |
| ६९ | यज्ञावभृथस्नानं ... | २०० |
| ७० | वृक्षारामादिप्रतिष्ठा ... | २०२ |
| ७१ | विनायकपूजा .. | २०२ |
| ७२ | विशेषस्नानादिकथनम् ... | २०४ |
| ७३ | सूर्यार्चनं .. | २०९ |
| ७४ | शिवपूजा .. | २११ |
| ७५ | अग्निस्थापनादिकथनम् | २२० |
| ७६ | चण्डपूजा .. | २२७ |
| ७७ | कपिलादिपूजनम् .. | २२८ |
| ७८ | पवित्राधिवासनविधिः ... | २३१ |
| ७९ | पवित्रारोहणम् ... | २३८ |
| ८० | दमनकारोहणविधिः .. | २४२ |
| ८१ | समयदीक्षा .. | २४४ |
| ८२ | संस्कारदीक्षा ... | २५३ |
| ८३ | निर्वाणदीक्षाधिवासनं ... | २५६ |
| ८४ | निर्वाणदीक्षा ... | २६२ |
| ८९ | एकतत्त्वदीक्षा ... | २८४ |
| ९० | निर्वाणदीक्षाङ्गीभूताभिषेककथनं | २८५ |
| ९१ | नानामन्त्रकथनम् ... | २८६ |
| ९२ | पातालशिलान्यासः ... | २८८ |
| ९३ | वास्तुपूजा ... | २९५ |
| ९४ | प्रासादशिलान्यासः .. | ३०० |
| ९५ | शिवलिङ्गप्रतिष्ठासामग्री | ३०२ |
| ९६ | शिवलिङ्गाधिवासनविधिः | ३१० |
| ९७ | शिवलिङ्गप्रतिष्ठाविधिः... | ३२७ |
| ९८ | गौरीप्रतिष्ठाविधिः ... | ३३९ |
| ९९ | सूर्यप्रतिष्ठाविधिः .. | ३४१ |
| १०० | द्वारप्रतिष्ठा ... | ३४२ |
| १०१ | प्रासादकृत्यप्रतिष्ठा ... | ३४३ |
| १०२ | ध्वजारोहणम् ... | ३४५ |
| १०३ | जीर्णशिवलिङ्गोद्धारः... | ३४९ |
| १०४ | प्रासादसामान्यलक्षणम् | ३५२ |
| १०५ | गृहादिवास्तुकथनम् ... | ३५६ |
| १०६ | नगरादिवास्तुकथनम् .. | ३६२ |
| १०७ | स्वायम्भुवसर्गकथनम् ... | ३६५ |
| १०८ | भुवनकोषवर्णनम् ... | ३६७ |
| १०९ | तीर्थमाहात्म्यम् ... | ३७१ |
| ११० | गङ्गामाहात्म्यम् .. | ३७४ |
| १११ | प्रयागमाहात्म्यम् ... | ३७५ |
| ११२ | वाराणसीमाहात्म्यकथनम् | ३७७ |
| ११३ | नर्मदादिमाहात्म्यकथनम् | ३७९ |
| ११४ | गयामाहात्म्यकथनम् ... | ३८० |

अर्द्धाङ्गुलं तथान्यासां(१) क्रमान् न्यूनं तु कारयेत्।
अङ्गुलौ वृषणौ कार्यौ मेढ्रं तु चतुरङ्गुलम् ॥ ४४ ॥
परिणाहेन कोषाग्रं कर्त्तव्यञ्चतुरङ्गुलम्।
षडङ्गुलपरीणाहौ वृषणौ परिकीर्त्तितौ ॥ ४५ ॥
प्रतिमा मध्यमाख्या स्यादेतदुद्देशलक्षणम्।
अनयैव दिशा कार्यं लोके दृष्ट्वा तु लक्षणम् ॥ ४६ ॥
दक्षिणे तु करे चक्रमधस्तात् पद्ममेव च।
वामे शङ्खं गदाधस्ताद्वासुदेवस्य लक्षणम् ॥ ४७ ॥
श्रीपुष्टी चापि कर्त्तव्ये पद्मवीणाकरान्विते।
ऊरुमात्रोच्छ्रिते ताभ्यां मालाविद्याधरौ(२) तथा ॥ ४८ ॥
प्रभामण्डलगं यौ तौ आभा हस्त्यादिभूषणा।
पद्माभं पादपीठन्तु प्रतिमायाः समाचरेत् ॥ ४९ ॥

इत्यादिमहापुराणे आग्नेये प्रतिमालक्षणं नाम चतुश्चत्वारिंशोऽध्यायः ॥

## अथ पञ्चचत्वारिंशोऽध्यायः।

### पिण्डिकालक्षणकथनम्।

भगवानुवाच। पिण्डिकालक्षणं वक्ष्ये दैर्घ्येण प्रतिमासमा।
उच्छ्रायं प्रतिमार्द्धन्तु चतुःषष्टिपुटां(३) च ताम् ॥ १ ॥
त्यक्त्वा पङ्क्तिद्वयं चाधस्तदूर्द्ध्वं वर्त्तु कोष्ठकान्।

१ साद्धाङ्गुलं तथान्यासामिति ङ. चिह्नितपुस्तकपाठः।
२ मालिविद्याधराविति घ. चिह्नितपुस्तकपाठः।
३ चतुःषष्टिपदामिति ङ. चिह्नितपुस्तकपाठः।

विरूक्षणं कषायैश्च सर्वौषधिजलेन वा ॥ ६७ ॥
शुभपुष्पफलस्वर्णरत्नशृङ्गयवोदकैः(१) ।
तथा धारासहस्रेण दिव्यौषधिजलेन च(२) ॥ ६८ ॥
तीर्थोदकेन गाङ्गेन चन्दनेन च वारिणा ।
क्षीरार्णवादिभिः(३) कुम्भैः शिवकुम्भजलेन च(४) ॥ ६९ ॥
विरूक्षणं विलेपञ्च(५) सुगन्धैश्चन्दनादिभिः ।
सम्पूज्य ब्रह्मभिः(६) पुष्पैर्वर्मणा रक्तचीवरैः(७) ॥ ७० ॥
रक्तरूपेण(८) नीराज्य रक्षातिलकपूर्वकं ।
घृतौघैर्जलदुग्धैश्च कुशाद्यैरर्घ्यसूचितैः ॥ ७१ ॥
द्रव्यैः स्तुत्यादिभिस्तुष्टमर्चयेत्(९) पुरुषात्मना(१०) ।
समाचम्य(११) हृदा देवं ब्रूयादुत्तिष्ठतां प्रभो ॥ ७२ ॥
देवं ब्रह्मरथेनैव क्षिप्रं द्रव्याणि तन्नयेत्(१२) ।
मण्डपे पश्चिमद्वारे शय्यायां विनिवेशयेत् ॥ ७३ ॥
शक्त्यादिशक्तिपर्य्यन्ते(१३) विन्यसेदासने शुभे ।

---

१ ओडुपुष्पफलस्वर्णरत्नशृङ्गगवोदकैरिति ग० ।

२ दिव्यौषधिजलेन वा इति ग० ।

३ क्षारार्णवादिभिरिति ङ०, छ०, ज० च ।

४ सरः कुम्भजलेन तु इति ज० ।

५ विकर्षणं विलेपञ्चेति घ०, ज० च ।

६ वक्त्रभिरिति ज० ।

७ ब्रह्मणा रक्तचन्दनैरिति ग० । ब्रह्मणा रक्तजीवकैरिति ङ० ।

८ वक्त्ररूपेण इति ग०, घ०, ज० च ।

९ स्तुत्यादिभिस्तुत्यमर्घयेदिति ख०, छ० च ।

१० पुरुषात्मनेति ख०, ग०, घ०, छ० च ।

११ समाचर्येति ग० ।

१२ तर्पयेदिति ख०, छ० च ।

१३ शक्त्यादिमूर्त्तिपर्य्यन्ते इति ख०, घ०, ज० च ।

प्राक्सौम्यस्थे च दण्डाख्यं प्राग्याम्ये वातसञ्ज्ञकं ॥ २५ ॥
आग्नेन्द्रौ गृहचुल्ल्याख्यं(¹) त्रिशूलं तद्विवर्ज्जितम् ।
पूर्वशालाविहीनं(²) स्यात् सुक्षेत्रं वृद्धिदायकं ॥ २६ ॥
याम्ये हीने भवेच्छूली त्रिशालं वृद्धिकृत् परं(³) ।
पक्षघ्नं जलहीनेऽङ्कः सुतघ्नं वज्रसञ्ज्ञकम् ॥ २७ ॥

---

सत्यलोकतः । अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः । पादाद्यधस्तु भूर्लोको भुवः सूर्य्याद्ध्रुवः स्मृतः । स्वर्लोको भुवान्तश्च नियुतानि चतुर्द्दश । एतदण्डकटाहेन वृतो ब्रह्माण्डविस्तरः । वारिवह्न्यनलाकाशैस्ततो भूतादिनावधि । वृतं दशगुणैरण्डं भूतादिर्महता तथा । दशोत्तराण्यशेषाणि एतैः समस्तैर्महतामुने । महान्तञ्च समावृत्य प्रधानं समवस्थितं । अनन्तस्य न तस्यान्तः संख्यानं न च विद्यते । हेतुभूतमशेषस्य प्रकृतिः सा परा मुने । असङ्ख्यातानि चाण्डानि तत्र जातानि चेदृशां । दारुण्यग्निर्यथा तैलं तिले तद्वत् पुमानिति । प्रधानेऽवस्थितो व्यापी चेतनात्मात्मवेदनः । प्रधानञ्च पुमांश्चैव सर्वभूतात्मभूतया । विष्णुशक्त्या महत्-प्राज्ञवृत्तौ संश्रयधर्म्मिणौ । तयोः सैव पृथग्भावे कारणं संश्रयस्य च । महाख्यं सुतलञ्चाख्यं पातालं चापि सप्तम । कृष्णपीतारुणाः शुक्लशर्कराशैलकाञ्चनाः । भूमयस्तेषु चान्येषु सन्ति दैत्यादयः सुखं । पातालानामधश्चान्ते शेषो विष्णोश्च तामसः । गुणानन्त्यान् स चानन्तः शिरसा धारयन् स्थितः । भुवोऽधो नरका लोकं नयते त्वचवैष्णवः । वारिणा भाविता पृथ्वी यावत्तावन्नभो मतं । सिद्धान्तमस्तु याम्ये च,
इन्द्राख्यं यमसूर्य्यकं ।

सप्तस्वेषु क०, ख०, ग०, घ०, ङ०, च०, झ०, चिह्नितपुस्तकेषु सावित्रः सालयः इत्यतः परं नैष पाठो वर्त्तते । तेषु तु मुद्रितपाठ एव वर्त्तते । पुनः ज० चिह्नित-पुस्तके सावित्रः सालय इत्यतः परं इन्द्राख्यं यमसूर्य्यकमित्यन्तः पाठो नास्ति । ज० चिह्नितपुस्तके य उक्तपाठो दृश्यते तत्र पूर्वापरसङ्गतिर्नास्ति । प्रकरणान्तरीय-पाठोऽयमत्र लेखकभ्रमात् समागत इति भाति ।

१ गृहचुल्ल्याख्यमिति ख० ।

२ पूर्वशालाविहीनमिति ङ० ।

३ याम्ये हीने भवेच्छूली त्रिशालं द्वितित्वरमिति झ० । याम्यहीने भवेच्छूली त्रिशालं वित्तकृत्परमिति ग० ।

धर्मः कलिश्च नैरत्यश्च प्राग्द्वारेष्वष्टसु ध्रुवं।
दाहोऽसुखं सुहृन्नाशो धननाशो मृतिर्द्धनं(१) ॥ २६ ॥
शिल्पित्वं तनयः स्याच्च याम्यद्वारफलाष्टकं।
आयुःप्राप्राज्यशस्यानि(२) धनशान्त्यर्थसङ्क्षयाः ॥ २७ ॥
शोषं भोगं चापत्यञ्च(३) जलद्वारफलानि च।
रोगो मदार्त्तिमुख्यत्वं चार्थायुः कृशता मतिः ॥ २८ ॥
मानञ्च द्वारतः पूर्वं(४) उत्तरस्यान्दिशि क्रमात्।

इत्याग्नेये महापुराणे गृहादिवास्तुर्नाम पञ्चाधिकशत-तमोऽध्यायः ॥

## अथ षड़धिकशततमोऽध्यायः।

### नगरादिवास्तुः।

ईश्वर उवाच। नगरादिकवास्तुञ्च वक्ष्ये राज्यादिवृद्धये।
योजनं योजनार्द्धं वा(५) तदर्थं स्थानमाश्रयेत् ॥ १ ॥

---

१ वनवासी स्मृतिर्धनमिति घ०। धर्म्मः कलिश्चेत्यादिः, स्मृतिर्धनमित्यन्तः पाठो ञ० पुस्तके नास्ति।

३ आयुः प्रावाद्यशस्यानीति ख०, ङ० च।

२ भोगं च पत्यं चेति ख०,ङ० च।

४ द्वारतः प्रोक्त इति घ०।

५ योजनार्द्धमर्द्धं च इति घ०,ङ० च।

